**सन्धिं कुरुत**

१ ग्रामात् चलितः = ग्रामाच्चलितः

ग्रामाद् चलितः (झलां जशोऽन्ते 8.2.39)

ग्रामाज् चलितः (स्तोः श्चुना श्चुः 8.4.40)

ग्रामाच् चलितः  (खरि च 8.4.55)

२ हरिस् छत्रधरः = हरिश्छत्रधरः (स्तोः श्चुना श्चुः 8.4.40)

३ ईश्वरात् जगत् जायते = ईश्वराज्जगज्जायते

ईश्वराद् जगद् जायते (झलां जशोऽन्ते 8.2.39)

ईश्वराज् जगज् जायते (स्तोः श्चुना श्चुः 8.4.40)

४ सोमसुत् झकारः = सोमसुज्झकारः

सोमसुद्  झकारः (झलां जशोऽन्ते 8.2.39)

सोमसुज्  झकारः (स्तोः श्चुना श्चुः 8.4.40)

५ तद् चैतन्यम् = तच्चैतन्यम्

तज् चैतन्यम् (स्तोः श्चुना श्चुः 8.4.40)

तच् चैतन्यम् (खरि च 8.4.55)

६ याच् ना = याच्ञा (स्तोः श्चुना श्चुः 8.4.40)

७ शश् नाथः = शश्नाथः (शात् 8.4.44)

८ अश् नित्यम् = अश्नित्यम् (शात् 8.4.44)

९ जश् त्वम् = जश्त्वम् (शात् 8.4.44)

१० श् तिप् = श्तिप् (शात् 8.4.44 )

११ उद् ज्वलः = उज्ज्वलः  (झलां जशोऽन्ते 8.2.39)

१२ भवान् षण्ढः = भवान्षण्ढः (तोः षि 8.4.43)

१३ हरिस् षडङ्गमधीते =  हरिष्षडङ्गमधीते  (ष्टुना ष्टुः 8.4.41)

१४ परिव्राट् साधुः = परिव्राड्साधुः (न पदान्ताट्टोरनाम् 8.4.42)

१५ सोमसुत् षडङ्गमधीते = सोमसुत्षडङ्गमधीते

सोमसुद् षडङ्गमधीते (झलां जशोऽन्ते 8.2.39)

सोमसुद् षडङ्गमधीते (तोः षि 8.4.43)

सोमसुत् षडङ्गमधीते (खरि च 8.4.55)

१६ अग्निचित् ठकारः = अग्निचिट्ठकारः

अग्निचिद् ठकारः (झलां जशोऽन्ते 8.2.39)

अग्निचिड् ठकारः (ष्टुना ष्टुः 8.4.41)

अग्निचिट् ठकारः (खरि च 8.4.55)

१७ राट् नगरी = राण्णगरी

राड् नगरी (झलां जशोऽन्ते 8.2.39)

राड् णगरी (वार्तिकम् - अनाम्नवति नगरीणामिति वाच्यम् )

राण् णगरी (यरोऽनुनासिकेऽनुनासिको वा 8.4.45)

१८ इट् न = इण् न

इड् न (झलां जशोऽन्ते 8.2.39)

इण् न (यरोऽनुनासिकेऽनुनासिको वा 8.4.45, (न पदान्ताट्टोरनाम् 8.4.42)

१९ हेतुमत् णौ = हेतुमण्णौ

हेतुमद् णौ  (झलां जशोऽन्ते 8.2.39)

हेतुमड् णौ  (ष्टुना ष्टुः 8.4.41)

हेतुमण् णौ  (यरोऽनुनासिकेऽनुनासिको वा 8.4.45)

२० भृस्ज् औ = भृज्जौ

भृश्ज्  औ  (स्तोः श्चुना श्चुः 8.4.40)

भृज्ज् औ (झलां जश्झशि 8.4.53)

**सन्धिविच्छेदं कुरुत**

१ कृष्णश्चपलः = कृष्णस् + चपलः (स्तोः श्चुना श्चुः 8.4.40)

२ यज्ञः = यज् + नः  (स्तोः श्चुना श्चुः 8.4.40)

३ अग्निचिच्छिनत्ति  =  अग्निचित्  +  छिनत्ति

अग्निचिद्  छिनत्ति  (झलां जशोऽन्ते 8.2.39)

अग्निचिज् छिनत्ति  (स्तोः श्चुना श्चुः 8.4.40)

अग्निचिच् छिनत्ति  (खरि च 8.4.55)

४ नारदश्शशाप = नारदस् + शशाप (स्तोः श्चुना श्चुः 8.4.40)

५ सच्छात्रः = सत् + छात्रः

सद् छात्रः (झलां जशोऽन्ते 8.2.39)

सज् छात्रः (स्तोः श्चुना श्चुः 8.4.40)

सच् छात्रः (खरि च 8.4.55)

६ अश्नाति = अश् + नाति (शात् 8.4.44)

७ सोमसुड्ढौकसे = सोमसुत् + ढौकसे

सोमसुद् ढौकसे (झलां जशोऽन्ते 8.2.39)

सोमसुड् ढौकसे (ष्टुना ष्टुः 8.4.41)

८ श्रीमञ्झटिति = श्रीमन् + झटिति (स्तोः श्चुना श्चुः 8.4.40)

९ उच्छेदः = उत् + छेदः

उद् छेदः (झलां जशोऽन्ते 8.2.39)

उज् छेदः (स्तोः श्चुना श्चुः 8.4.40)

उच् छेदः (खरि च 8.4.55)

१० राज्ञः = राज् + नः

राज् ञः (स्तोः श्चुना श्चुः 8.4.40)

११ समन्ताज्जिघ्रति = समन्तात् + जिघ्रति

समन्ताद् जिघ्रति (झलां जशोऽन्ते 8.2.39)

समन्ताज् जिघ्रति (स्तोः श्चुना श्चुः 8.4.40)

१२ न पदान्ताट्टोरनाम् = न पदान्तात् + टोरनाम्

न पदान्ताद् टोरनाम् (झलां जशोऽन्ते 8.2.39)

न पदान्ताड् टोरनाम् (ष्टुना ष्टुः 8.4.41)

न पदान्ताट् टोरनाम् (खरि च 8.4.55)

१३ कृषीष्टः = कृषीष् + तः (ष्टुना ष्टुः 8.4.41)

१४ गरुत्माण्डयते = गरुत्मान् डयते (ष्टुना ष्टुः 8.4.41)

१५ टिड्ढाणञ् = टित् + ढाणञ्

टिद् ढाणञ् (झलां जशोऽन्ते 8.2.39)

टिड् ढाणञ् (ष्टुना ष्टुः 8.4.41)

१६ पेष्टुम् = पेष्  +  तुम्  (ष्टुना  ष्टुः 8.4.41)

१८ द्दष्टः =  द्दष्  +  तः  (ष्टुना  ष्टुः 8.4.41)

१९ स्याण्णौ = स्यात् + णौ

स्याद् णौ (झलां जशोऽन्ते 8.2.39)

स्याड्   णौ (ष्टुना ष्टुः 8.4.41)

स्याण् णौ (यरोऽनुनासिकेऽनुनासिको वा 8.4.45)